श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्री यामुनमुनिस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यामुनमुनिस्तुतिः ॥

यदुपज्ञ मशेषवैष्णवश्श्रीः
प्रथिता योगरहस्यविच्च येन।
शठकोपमुनिर्विलोकित स्तं
विबुधं नाथमुनिं नमामि नित्यम्॥ 1 ॥

श्रीमन्नाथमुनेर्बुधोत्तममणेर्योगीश्वरस्यात्मजः
श्रीमानीश्वरमुन्यभिख्य उदित स्सद्धर्मसंरक्षकः।
योऽस्मत्संस्तवनाश्रयस्य जनक श्श्रीयामुनार्यस्य तं
प्रख्यातात्मगुणादिसंपदमहं श्रीवैष्णवाग्र्यं भजे॥ 2 ॥

श्रीमद्रङ्गाधिनेतुर्निरवधिकदयापात्रभूतेश्वराख्यः
प्रादुर्भूतः कुमाराकृति रतिसुकृती विश्वविख्यातकीर्तिः।
धातावब्दे कुळीरे बुधदिनमहितेतूत्तराषाढतारे
राकायां रङ्गपुर्यां श्रुतिशिखरयुगोल्लासकारी तमीडे॥ 3 ॥

शुक्लपक्षचन्द्रवत् प्रवर्धमाननन्दनं
युक्तकालकारितद्विजार्हकर्मशोभिनम्।
पाठकोक्तिमात्रलब्धकण्ठपाठपाठिनं
यामुनं पितामहोक्तनामधारिणं श्रये॥ 4 ॥

महाभाष्यभट्टाभिधानो बुधेन्द्रो
बभौ सर्वशास्त्रप्रवक्ता स यस्य।
तदानन्यसामान्यशास्त्रोपदेष्टा
स्तुवेऽतः प्रवीणं मुनिं यामुनं तम्॥ 5 ॥

आस्थान्यां चोळराजः प्रथितबुध उवासाक्कियाळ्वानभिख्यः
 गर्वी चोर्वीबुधेभ्यो तुदति कर मुपादाय तान् भर्त्सयन् स्म।
मेधावी यामुनार्य स्स्वगुरु मपि तथा पीडितं वीक्ष्य रुष्टः
 तस्मै दृप्ताय पद्यं नवय मिति कृतं प्रैषयत् तं नमामि ॥ 6 ॥

आकर्ण्यैतां प्रवृत्तिं निजपरिजनतो मान्य आनीयतां द्राक्
 सर्वंमन्यं मदीयं जयति यदि तदानन्यसाधारण स्स्यात्।
इत्युक्त्वान्दोलिकाद्यैः यमखिलबिरुदै राट् समानाययत् यः
 आशैलादि त्यवादीत् रसमय मभयः पद्यं ईडे गुरुं तम् ॥ 7 ॥

पूर्वं शास्त्रार्थवादात् प्रचलित उभयोर्लौकिके वाक्प्रयोगे
 माता ते नैव वन्ध्या मनुजपतिरयं सार्वभौम स्सतीयम्।
ईदृक्प्रश्नत्रयस्य प्रतिवच उचितं यस्य नोचे स विद्वान्
 यस्मै राज्यार्ध मुर्वीपति रथ च मुदा दत्त सम्भावये तम् ॥ 8 ॥

आयान्तं प्रतिवीक्ष्य चोळमहिषी प्रोचे मुदा यामुनं
 यं कारुण्यपयोधि मात्मगुणिनं पाण्डित्यकल्पद्रुमम्।
किं मां शास्तु मुपागतोऽसि भगवन्नुज्जीवये त्यब्रवीत्
 यस्य द्राविडनामतोऽपि चरितं ख्यातं भजे तं गुरुम् ॥ 9 ॥

राजभोगभोगिनं सभार्यमार्ययामुनं
 राममिश्र एकदा गुरोर्निदेशतो मुदा।
आत्मसाद्विधातु मेत्य नेक्षितुं शशाक यं
 शाकमेकमीप्सितं ददावलर्कनामकम् ॥ 10 ॥

पाचकस्य कस्यचित्करे विपच्य भोजये -
 त्यन्वहं तथाशयन्नपीप्सितं यदाप न।
जोष मेकवासरं स्थितोऽथ सूद माह यो
 भो ! अलर्कशाकदं प्रदर्शयेति तं भजे ॥ 11 ॥

नृपविभवविलोलो राममिश्रं विवक्षुं
समयविदुपयातं यामुनार्योऽन्वयुङ्क्तः।
अतिशयमहिमा त्वं काङ्क्षसे किं ददानी -
त्यथ किमपि न चाहं किं तु दित्सुः प्रभो ! ते ॥ 12 ॥

आवन् प्रत्ता मनीषिन् निधिमिव भवतः कञ्चिदर्थं त्वदर्थं
श्रुत्वैवोपैष्यभिज्ञ स्तदवधि सविधं देहि ते मेऽभिवेत्त्रे।
एवं विज्ञापितो य स्तदनु बहुविधं तेन गीतार्थसारं
विज्ञायात्यन्तहृष्टोऽभवदुपगमितोपाय आभावये तम् ॥ 13 ॥

गीतार्थं सरहस्य माशु बुबुधे श्रीराममिश्राश्रयात्
साक्षात्कार मनन्यबोधसुलभं मोक्षोपकारं यतः।
तस्योपाय मवाप यश्च समये वैराग्यभाग्यो बभौ
श्रीरङ्गेशनिषेवणैकसुमतिर्भूत्वा तं अन्तर्दधे ॥ 14 ॥

परमात्मन्यनुरक्तं
प्राकृतविषये विरक्तं आत्मज्ञम्।
परिपक्वचित्तवृत्तिं
यामुनयतिचक्रवर्तिनं वन्दे ॥ 15 ॥

पूर्णं महापूर्ण मुखै स्स्वशिष्यैः
गुणार्णवैर्य नियुयोज तूर्णम्।
श्रीराममिश्रः कुरुकाधिपाल -
सूरिं रहस्यार्थमिहीत्यये तम् ॥ 16 ॥

श्रीराममिश्रगुरु रात्मान्तकाल मभिवीक्ष्यात्मबोधवशिनं
श्रीरङ्ग आस्व बुधमान्यं स्थिरीकुरु च सद्दर्शनप्रवचने।
एवं समीर्य कमलाक्षं विचिन्त्य गुरु मादिश्य यं स्वयमयात्
तं यामुनार्य मह मीडे सदावसथ माधूतवादिनिकरम् ॥ 17 ॥

यथा गुरूक्तं कुरुकावलप्पन्
    वशे स्थितं योगरहस्य माप्तुम्।
य स्तं समाधिस्थ मुपेत्य भीतो
    विघ्नाच्च तूष्णीं स्थित आश्रये तम्॥ **18** ॥

श्रीनाथमुन्यन्वयज स्सुधीन्द्रः
    यः कोप्युपायात इहास्ति वेति।
श्रुत्वा गिरं यश्च विसिष्मयेऽथ
    ज्ञातं कथं न्वित्यवदत् तमीडे॥ **19** ॥

पद्मासेचनकांबुजाक्षिमधुरालोकैर्विकृष्टोप्यहो -
    मा मानन्दिन मप्यपास्य कमलाकान्तोऽन्य मन्वैक्षत।
वंश्यो नाथमुनेर्भवेदिति विदन् येनाथ संप्रार्थितः
    भूयो यस्य समागमाय समयं चाऽहाश्रये तं गुरुम्॥ **20** ॥

श्रीरङ्गेऽध्ययनोत्सवे शठरिपो स्सूक्तिं सुगीतां बुधैः
    श्रुत्वानन्तपयोजनाभचरणाम्भोजैकसेवादरः।
गत्वाऽनन्तपुरं निजाभिलषितं संपूर्य तत्रोषितः
    स्मृत्वा योगरहस्यवेदनदिनं खिन्न स्तमार्यं भजे॥ **21** ॥

काञ्चीमण्डलवासिनौ द्विजवरौ श्रीरङ्गमासेदतुः
    नत्वा यं मुनिपं स्वदेशकुशलो अन्तं प्रसङ्गान्मुदा।
श्रीरामानुजवैभवं बहुमुखं चा वेदयामासतुः
    श्रुत्वैतादृश मिष्टमेव फलितं मेने च य स्तं भजे॥ **22** ॥

शिष्यै स्साकं करिगिरिपतेर्मङ्गळाशासनं यः
    कृत्वा रामावरजयमिनं प्रेक्ष्य दूराच्च तुष्टः।
देवं भूयोप्यनमदभयं प्रार्थयन् स्वेष्टसिद्ध्यै
    रङ्गास्थाने निजमतपरीरक्षणार्थं भजे तम्॥ **23** ॥

श्रीराममिश्रगुरुराडुपदेशलब्ध -
गीतार्थसारसमुदीक्षणतो वितेने।
गीतार्थसङ्ग्रहसमाख्यकृतिं प्रशस्तां
य स्तत्त्वनिश्चयचणः प्रणमाम्यहं तम्॥ 24 ॥

प्रामाण्यमागमानां
प्राज्ञंमन्यैर्विलोपितं जगति।
प्रामाण्य मागमीयं
पुनरप्य स्थापि येन तं वन्दे॥ 25 ॥

पुरुरुषा पुरुषाः परुषोक्तिभिः
पुरुषतत्त्वविवाद मकुर्वत।
पुरुषनिर्णयमाह तदा च यः
तमुपयामि गुरुं मुनियामुनम्॥ 26 ॥

यदा लक्ष्मीतत्त्वे विविधकथका नैकमतयः
मिथो वादोन्मत्ता नयपथविदूरा स्समभवन्।
चतुश्श्लोक्या य स्तान् व्यजयत तदा निर्णयगिरा
सदा सेवे भक्त्या निखिलजननीं तं च यमिनम्॥ 27 ॥

आत्मेश्वराद्ये प्रथिते च सिद्धी
संविन्मुखा सिद्धि रितीह तिस्रः।
तत्त्वप्रबोधाय हि यो व्यतानीत्
प्रणौमि तं यामुन मद्वितीयम्॥ 28 ॥

प्रत्नवाक्प्रयत्नलभ्य मुक्त्ययत्नदायिनं
तत्त्वसार मद्वितीय मत्युदारभावदम्।
स्तोत्ररत्ननामधेय मागमोक्तिभक्तिदम्
य श्चकार यामुनं त माश्रये कवीश्वरम्॥ 29 ॥

स्मारं स्मारं गुरुं स्वं प्रथितमतिमता मुत्तमं राममिश्रं
श्रीमद्रङ्गाधिनेतु स्सविध उपकृतं सर्वनिर्वाहशक्तम्।
श्रीमद्रामानुजं चायतियतितिलकं भावयन्नन्त्यकाले
आकुञ्च्यात्माङ्गुलीर्यः समदिश दखिलं तं भजे यामुनेयम्॥ 30 ॥

श्रीमद्यामुनसंयमीन्द्रसुगुणालङ्कारविद्योतिनीं
एतां त्रिंशतमादराद्विरचितां ये कीर्तयन्त्यन्वहम्।
गोपालेन गुरूत्तमाङ्घ्रिकमलास्वादैकलोलेन ते
विद्वांस स्सकलाभिनन्द्यचरिता भान्त्यात्मभाग्याधिकाः॥ 31 ॥

॥ इति श्री यामुनमुनिस्तुतिः समाप्ता ॥